प्रकाशके तैलादिस्नेहयोगेन १वर्त्तिकादाहकशिखान्विते प्रदीपे कार्त्तिके तद्दानप्रशंसा पाद्मे उत्तरख० यथा "शृणु दीपस्य माहात्म्यं कार्त्तिके च हरिप्रिय ! । यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् । सूर्य्यग्रहे कुरुक्षेत्रे नर्मदायां शशिग्रहे । तुलादानस्य यत् पुण्यं तदूर्ज्जे दीपदानतः । घृतेन दीपकं यस्तु तिलतैलेन वा पुनः । ज्वालयेन्मुनिशार्दूल ! अश्वमेधेन तस्य किम् । तेनेष्टं क्रतुभिः सर्व्वं कृतं तीर्थावगाहनम् । दीपदानं कृतं येन कार्त्तिके केशवाग्रतः । तावद्गर्जन्ति पापानि देहेऽस्मिन्मुनिसत्तम ! । यावत् कार्त्तिकमासे न दीपदानं कृतं भवेत् । तावद्गर्जन्ति पुण्यानि स्वर्गे मर्त्त्ये रसातले । यावज्ज्वलते दीपः कार्त्तिके केशवाग्रतः । श्रूयतेऽत्रापि पितृभिर्गाथा गीता महामुने ! । भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि । कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम् । अपि नस्ते भविष्यन्ति कुले सुचरिता गुणैः । दीपदानं कार्त्तिके ये दीप्यन्ति हरितुष्टिदम् । गयायां पिण्डदानेन कृतं नः प्रीणनं सुतैः । यैश्चापि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः । दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः । कार्त्तिके तैस्तु निम्नेष्ट ! नरकादुद्धृता वयम् । मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्दन ! । व्रतं सम्पूर्णतां यातु कार्त्तिके दीपदानतः । अनेनैव हि मन्त्रेण दीपं सङ्कल्पयेन्मुने ! । मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गव !" । वामनपुराणे च "दास्यते देवदेवाय दीपपुष्पानुलेपनम् । अपि नः स कुले भूयादेकादश्यां तिथौ नरः । करिष्यत्युपवासन्तु सर्व्वपातकहानिदम् । इत्थं पितॄणां वचनं श्रुत्वा नृपतिसत्तमः । ददौ च दीपान् विधिवत् विष्णोरायतने बलिः । सुगन्धतैलसंपूर्णान् दीपान् घृततैलकान् । सर्षपस्य सुतैलेन मधुकातसिसम्भवैः । दीपप्रदानान्नरकानन्धतामिस्रसंज्ञकान् । तीर्त्वा स भार्य्यया ब्रह्मन् ! विष्णुलोकमगात्ततः" वराहपुराणे दीपं स्पृष्ट्वा वैधकर्मकरणे दोष उक्तो यथा

"दीपं स्पृष्ट्वा तु यो देवि ! मम कर्माणि कारयेत् । तस्यापराधाद्वै भूमे ! पापं प्राप्नोति मानवः । तच्छृणुष्व महाभागे ! कथ्यमानं मयानघे ! । जायते षष्टिवर्षाणि कुष्ठी गात्रे परिप्लुतः । चाण्डालस्य गृहे तत्र एवमेव न संशयः । एवं भुक्त्वा तु तत्कर्म मम क्षेत्रे मृतो यदि । मद्भक्तस्यैव जायेत शुद्धे भागवते गृहे । प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि । तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु । यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी । चतुर्थभक्तमाहारमाकाशशयने स्वपेत् । दीपं दत्त्वापराधाद्वै तरन्ति मनुजा भुवि । शुचिर्भूत्वा यथान्यायं मम कर्मपथे स्थितः । एतत्ते कथितं देवि ! स्पर्शनात् दीपकस्य तु । संसारशोधनञ्चैव यत् कृत्वा लभते शुभम्" । वर्त्तिस्थज्वलदग्निशिखा हि दीपः तदङ्गस्नेहादिनियमो यथा वह्निपुराणे "घृतं तैलञ्च दीपार्थे स्नेहान्यन्यानि वर्जयेत्" । दीपभेदास्तद्दशाभेदाश्च कालिका० पु० ६८अ० उक्ता यथा "पुरश्चरणकृत्याञ्च दीपं शृणिवह भैरव ! । दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः । चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये" इत्युपक्रम्य "घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः । सार्षपः फलनिर्यासजातो वा राजिकोद्भवः । दधिजश्चाणुजश्चैव प्रदीपाः सप्त कीर्त्तिताः । पद्मसूत्रभवा दर्भगर्भसूत्रभवाऽथ वा । शणजा वादरी वापि फलकोषोद्भवाऽथ वा । वर्त्तिका दीपकृत्येषु सदा पञ्चभिदाः स्मृताः । तैजसं दारवं लौहं मार्त्तिक्यं नारिकेलजम् । तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते । दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्यैश्च भैरव ! । वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन । सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् । अकार्य्यपादघातञ्च दीपतापं तथैव च । तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा । दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव ! । कुर्व्वन्तं पृथिवीतापं यो दीपमुत्सृजेन्नरः । स ताम्रतापं नरकमाप्नोत्येव शतं समाः । सुवृत्तवर्त्तिस्नेहपात्रेऽभग्ने सुदर्शने । कृष्णमये वृक्षकोटौ तु दीपं दद्यात् प्रयत्नतः । लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् । न स दीप इति ख्यातो ह्योघवह्निस्तु स स्मृतः । नेत्राह्लादकरः स्वार्च्चिर्दूरताप विवर्जितः । सुशिखः शब्दरहितो निर्धूमो नातिह्रस्वकः । दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये । दीपवृक्षस्थिते पात्रे शुद्धस्नेहप्रपूरिते । दक्षिणावर्त्तवर्त्त्याढ्यस्तु चारुदीप्तः प्रदीपकः । उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः । वृक्षेण वर्जितो दीपो मध्यमः परिकीर्त्तितः । विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः । शाणं वा वादरं वास्त्रं जीर्णं मलिनमेव वा । उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधकः । उपादद्यान्नूत्नमेव सततं श्रीविवृद्धये । क्षौमजं रोमजं वस्त्रं